ISSN : 2583-2271
Vol. - I, No. 1: 2021

# कर्मण्येवाधिकारस्ते

**सत्येन्द्रनाथ आदकः**

## प्रबन्धसारः

*सनातनभारतवर्षे श्रीमद्भगवद्गीता शाश्वतप्रज्ञायाः सौरभी। सा सर्वशास्त्रमयी अपूर्वरहस्यमयी च सन्तापहारिणी - **'सर्वशास्त्रमयी गीता'**। गीता मानवसभ्यतायाः इतिहासे श्रेष्ठदानमेव। भारतवर्षस्य जातीयजीवने कोऽपि स्तरः नास्ति, यत्र गीतायाः आलोकप्रभा न विकीर्यते। सा भारतीयसंस्कृतेः प्राणभूता, गुणगौरवा च वरीवर्ति। अपि च सा पूर्ववर्तिनीनां सर्वासामपि उपनिषदां श्रुतीनां स्मृतीनां च सारगर्भतत्त्वानाम् उत्सस्थली। गीता मानवान् कर्मणः, देशभक्त्याः, परोपकारितायाश्च शिक्षां प्रददाति । अतः विश्वधर्माणां विश्वप्रेम्णां विश्वमानवतानां च आधारशीला सा। उक्तञ्च-*

*''विश्वधर्म, विश्वप्रेम, विश्वमानवता।*
*के शिखालो जगतेरे? भारतेर गीता।*
*ताइ-*
*देशे देशे अनूदिता आदृता अधीता।*
*जगतेर धर्मग्रन्थ भारतेर गीता॥''*

*सा सन्मार्गप्रदर्शिका लौकिकजनानां कृते अलौकिकम् उपदेशसारमावहति । गीता लोकप्रिया शान्तप्रिया च। सा देशातीता कालातीता चास्ति । अतः युगान्ते प्रलयकालेऽपि गीता अप्रकाशितरूपेण स्थास्यति।*

*गै+क्त = गीत+टाप् = गीता। पञ्चमवेदस्वरूपस्य महाभारतस्य भीष्मपर्वान्तर्गता सा भवति। स्वयं पद्मनाभस्य मुखपद्मविनिसृतेयं गीता साधूनां चित्तप्रसादिनी भूत्वा कलानिनादिनी सदा प्रवाहमाना पवित्रता गङ्गा इव शोभते। गीताम्भसि स्नानेन संसारमलनाशो भवति-*

*''मलनिर्मोचनं पुंसां जलस्नानं दिने दिने।*
*सकृद्गीताम्भसि स्नानं संसारमलनाशनम्॥''*

सनातनभारतवर्षे श्रीमद्भगवद्गीता शाश्वतप्रज्ञायाः सौरभी। सा सर्वशास्त्रमयी अपूर्वरहस्यमयी च सन्तापहारिणी -'सर्वशास्त्रमयी गीता'।[1] गीता मानवसभ्यतायाः इतिहासे श्रेष्ठदानमेव। भारतवर्षस्य जातीयजीवने कोऽपि स्तरः नास्ति, यत्र गीतायाः आलोकप्रभा न विकीर्यते। सा भारतीयसंस्कृतेः प्राणभूता, गुणगौरवा च वरीवर्ति । अपि च सा पूर्ववर्तिनीनां सर्वासामपि उपनिषदां श्रुतीनां स्मृतीनां च सारगर्भतत्त्वानाम् उत्सस्थली। गीता मानवान् कर्मणः, देशभक्त्याः, परोपकारितायाश्च शिक्षां प्रददाति। अतः विश्वधर्माणां विश्वप्रेम्णां विश्वमानवतानां च आधारशीला । उक्तम् च-

''विश्वधर्म, विश्वप्रेम, विश्वमानवता ।
के शिखालो जगतेरे ? भारतेर गीता।।
ताइ-
देशे देशे अनूदिता आदृता अधीता ।
जगतेर धर्मग्रन्थ भारतेर गीता॥''[2]

सा सन्मार्गप्रदर्शिका लौकिकजनानां कृते अलौकिकम् उपदेशसारमावहति। गीता-लोकप्रिया शान्तप्रिया च। सा देशातीता कालातीता चास्ति। अतः युगान्ते प्रलयकालेऽपि गीता अप्रकाशितरूपेण स्थास्यति।

गै+क्त = गीत+टाप् = गीता। पञ्चमवेदस्वरूपस्य महाभारतस्य भीष्मपर्वान्तर्गता सा भवति। स्वयं पद्मनाभस्य मुखपद्मविनिसृतेयं गीता साधूनां चित्तप्रसादिनी भूत्वा कलकलनिनादिनी सदा प्रवहमाना पवित्रा गङ्गा इव शोभते। गीताम्भसि स्नानेन संसारमलनाशो भवति-

''मलनिर्मोचनं पुंसां जलस्नानं दिने दिने।
सकृद्गीताम्भसि स्नानं संसारमलनाशनम्॥''[3]

अपि च-

''गीता कल्पतरोश्छाया शीलता शुभदा सुखा।
आश्रित्य तां जनाः सर्वे भूयासुः सफलोद्यमाः॥[4]

गीतायां बहवः कल्याणकराः मोहज्ञानविनाशकाः सत्यस्वरूपाः उपदेशाः भगवता प्रतिपादिताः। ज्ञानगरिमान्विता गीता खलु आत्मनः स्वरूपं निरूपयति, निष्कामकर्मयोगं निष्पादयति, ज्ञानयोगं ज्ञापयति, भक्तियोगं भावयति, स्थितप्रज्ञतां प्रमाणयति, वर्णाश्रमधर्मं प्रकाशयति। तस्याः भाषाशैली तादृशी मनोरमा, प्रसादगुणयुक्ता, ज्ञानविज्ञानसमन्विता च। गीतायाः मतमिदं यदा यदा भवति मानव एवं विधस्तदैव ज्ञेयमिदं यदसौ स्वकीयं चरमं पदं लक्ष्यं वा लब्धवान्। सा भावजीवने कर्मजीवने च पूर्णतां प्रकाशयति।

**कर्म**

[1] श्रीगीता( भूमिका पृ-३)
[2] श्रीगीता ) भूमिका पृ-५४)
[3] प्रबन्धरत्नाकर-पृ-४२
[4] प्रबन्धरत्नाकर -४२

ISSN : 2583-2271
Vol. - I, No. 1: 2021

कृ+मन्=कर्म । कर्म इति किम्? कर्मणः स्वरूपं यत् बहिर्दृश्यमानकर्मेन्द्रियाणां क्रिया केवलं कर्म न भवति। येषामुपरि मानवानां जन्ममृत्यू निर्भरशीलौ तत् कर्म। कर्मण: स्वरूपं योगवाशिष्टरामायणे उच्यते-

"कर्मबीजं मन: स्पन्द: कथ्यतेऽथानुभूयते।
क्रियास्तु विविधास्तस्य शाखाश्चित्रफलास्तरो॥"[5]

कर्मण: सर्वप्रथमरूपं मानसिकम्। अत: मनस: स्पदनं कर्मण: एकरूपं । कर्मण: बीजं मनस: वासनात्मकं स्पन्दनं यस्य फ़लं लभते । कर्म एव जीवनम् । कर्म विहाय कामना न सम्भवति। मानवजीवने कर्मैव तारकम्, साधकं, दु:खनिरोधकं, पापनिवारकम्, अधिव्याधिविनाशकञ्चेति। कर्मणा चतुर्वर्गफलप्रप्ति: भवति। अत: कर्म एव शक्ति: मुक्तिश्च। कर्म एव मानवानां जीवनमूल्याणां विचारकम्।

कर्ममयं खल्विदं जगत्। कर्म एव जीवनम्। कर्मसम्पादनेन एव फलम्। कर्म विना न कोऽपि जनः क्षणं तिष्ठति - 'न हि कश्चिदक्षणमपि जातु तिष्ठत्यकर्मकृत्'।[6] कर्म विना न कश्चिज्जन आत्मोन्नतिं कर्तुमर्हति। कर्म अपि आनन्ददायकं भवति। कर्मणा चतुर्वर्गफललाभस्य चरितार्थता । कर्म एव शक्तिः मुक्तिश्च।

शास्त्रेषु त्रिविधं कर्म निरूपितं - प्रारब्धं, सञ्चितं, क्रियमाणं च। योगशास्त्रानुसारं चतुष्प्रकाराणि कर्माणि। योगसूत्रे उक्तम्- 'कर्माशुक्लाकृष्णां योगिनस्त्रिविधामितरेषाम्'[7]। यथा- कृष्णम्, शुक्लकृष्णम्, शुक्लम्, अशुक्लकृष्णञ्च । वेदे त्रिविधं कर्म प्रतिपादितम्-नित्यकर्म, नैमित्तिककर्म, काम्यकर्म च। सन्ध्यावन्दनादीनि नित्यकर्माणि, जन्ममरण-शौचपालनादीनि नैमित्तिककर्माणि, दर्शपूर्णमास-यागादीनि काम्यकर्माणि भवन्ति। गीतायां कर्म द्विविधं - सकामकर्म निष्कामकर्म च। फलाशया कृतं कर्म सकामकर्म मन्यते। फलाकाङ्क्षां विहाय कर्मफलानि परमात्मनि समर्प्य श्रद्धया विहित कर्मसम्पादनं हि निष्कामकर्म। उभयोरप्युपासनयोर्निष्कामो-पासना श्रेयसी।

जीवननिर्वहनाय वा स्वजीवनं सफलीकर्तुं कर्म आवश्यकम्। आजन्मनः आमृत्योः मानवाः तेषां स्वकीयास्तित्वरक्षणार्थं सदा कर्मरताः भवन्ति। कीदृशं कर्म श्रेयोवहम्? इति जिज्ञासामुत्तर प्रस्तूयते यत् अनासक्तिभावनयैव क्रियमाणं कर्म लोक-परलोकोभयसुखदमिति। प्रकृतिः अपि जनान् कर्म कर्तुं प्रभवति। प्रकृतिसम्भवैः गुणैः वशीभूतः सन् जीवः कर्मणि प्रेरयति। उक्तम् च-'कार्यते ह्यवशः कर्म सर्व: प्रकृतिजैर्गुणैः'[8]। गुणः त्रिविधः सत्त्वं रजस्तमश्चेति। सत्त्वगुणः सुखेन ज्ञानसङ्गेन च देहिनं बध्नाति। सर्वथा दोषरहितं विकारशून्यं सत्त्वम्। रजोगुणः कर्मणः कर्मफलस्य आसक्तिना जीवात्मानं बध्नाति। रजोगुणः मानवचित्तेषु भोगवासनां जनयति। तमोगुणः प्रमाद-आलस्य-निद्राभिः जीवात्मानं बध्नाति। तमोगुणः मायां मोहं च उत्पादयति। यत् कर्म कामनापूर्वकं क्रियते यथा अग्निहोत्रादिकं तेन मानवः स्वर्गादिषु सुखमनुभवति परं मोक्षप्राप्तिः कदापि न सम्भवति। परं यत् कर्म आत्मनः कामनां विहाय क्रियते तत् निष्कामकर्म कथ्यते। तस्य विधिना मानवो मुक्तिं लभते। भगवता श्रीकृष्णेन प्रतिपादितम्-

"यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति॥"[9]

जागतिकं किमपि वस्तु न शाश्वतम्। सर्वं खलु नश्वरम्। जातस्य हि ध्रुवो मृत्युः। अतः न कोऽपि मानवः दुःखं लिप्सते। परन्तु सर्वे एव सुखं कामयन्ते।छान्दोग्योपनिषदि उक्तम् -'भूमैव सुखं नाल्पे सुखमस्ति'[10]। इदं क्षणमपि जीवनं निष्कामकर्मणा सार्थकताम् अर्जयति। अस्माकं फलस्पृहा न कर्तव्या। यतो हि कर्मणि एव मानवस्य अधिकारोऽस्ति न फलेषु भगवता श्रीकृष्णेन उक्तम्-

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूमा ते सङ्गोऽस्त्वकर्मणि॥"[11]

निष्कामकर्मणा मानवानां मुक्तिमार्गः प्रशस्तो भवति। जगतीतलेऽस्मिन् निष्कामकर्मानुष्ठानात् वर्षशतकं जीवितुमिच्छेत् जनः। उपनिषदि उच्यते-

"कुर्वन्नेवेह कर्माणि जीजिविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥"[12]

तथा च श्रुति- 'शतायुर्वै पुरुषः जीवेम शरदः शतम्'[13]। कल्याणकारि कर्म कदापि बन्धनं न सृजति। सुकर्म हि मानवानां अमरत्वं स्थायित्वं च। यद्यपि शरीरस्य क्षणस्थायित्वं तथापि गुणानां खलु चिरस्थायित्वम्। अतः गीतायायुक्तम् -'शरीरयात्रापि च ते न प्रसिध्येदकर्मणः'[14]। अपि च- 'हतेषु देहेषु गुणा धरन्ते'[15]। निष्कामकर्मफलानि च सुखाय शान्तये भवन्ति। अनेन मानवाः अज्ञानमयजगत: ज्ञानालोकं प्रविशन्ति। ये तु सकामकर्ममार्गमुपासते ते तमसावृतं गहनान्धकारं प्रविशन्ति। उपनिषदि उच्यते-'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते'।[16] यत्र विषयलालसा न प्रबला स्यात् तत्र साधकं न विपथं चालयेत् तदर्थम् अपारमार्थिकीं वासनां त्यक्त्वा परमानन्दानुभवं कुर्यात्।

---

[5] योगवशिष्टरामायणम्-३/९६/११
[6] श्रीगीता-३/५
[7] योगसूत्र-४-७
[8] श्रीगीता-३/५
[9] श्रीगीता-५/५
[10] छान्दोग्योपनिषद्
[11] श्रीगीता २/४७
[12] ईशोपनिषद्-२
[13] शुक्लयजुर्वेदः – ३६/२४
[14] श्री. गीता-३/८
[15] संस्कृतसप्तकम्-पृ ७०
[16] ईशोपनिषद्-९

संयम: मानवानां मेरुदण्डः। कर्म केवलं संयमेन एव करणीयं, तत्र फलासक्तिर्नैव विधेया। संयमं विनापि निष्कामकर्म न साधयति। भोगवासनाद्रव्ये सकृत् उपभुक्ते भोगकामना न शाम्यति, पुनः पुनः कामना वर्धते। यथा पुनः पुनः घृतप्रदानेन एव अग्निः विवर्धते।

यदि मानवाः स्वार्थपरतां विहाय परहितानि साधयन्ति तर्हि कीर्तिमन्तो भवन्ति। त्यागेन अमृतत्वं लभते। भोगवासनात्याग एव प्रकृतिमुक्तिः। श्रीमत्स्वामिप्रणयानन्दजीमहाराजेन उक्तम्- 'सव रकम वासनार नाश येखाने प्रकृतमुक्ति सेखाने'। किन्तु यः मिथ्याचारी कदापि स न साफल्यं प्राप्नोति। तस्य साफल्यम् अलीकमेव प्रतिभाति। तथाहि उच्यते- 'तस्य तदासननियमनादिकमाचरणं मिथ्या अलीकमेव निष्फलत्वात्'[17]। आङ्गलसाहित्ये प्रवादः अस्ति- 'Every action was its equal & opposite reaction'। ममताशून्यं शोकशून्यञ्च विहाय कर्म करणीयम्। गीतायामुक्तं-

''मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥''[18]

कर्मफलाशां परित्यज्य यत् कर्म क्रियते, तन्न बन्धनाय भवति। मानवाः निष्कामकर्मणा एव साफल्यं सिद्धिलाभं च प्राप्नुवन्ति। अतः निष्कामकर्मणः प्राधान्यं जीवने वर्तते। यथा जनकाश्वपतिप्रभृतयः राजर्षयः निष्कामकर्मणा एव कीर्तिं प्राप्य अधुनापि इह जगति पूज्यन्ते। तदर्थं श्रीकृष्णेणोक्तं-

''कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि॥''[19]

अधुनापि देशप्रेमिका: सुभाषचन्द्र-चित्तरञ्जन-क्षुदिरामादय:, समाजसंस्कारका विद्यासागर-राममोहन-विवेकानन्ददय:, साहित्यिका: रवीन्द्रनाथ-शरच्चन्द्रनजरुलादय: महामानवा: दृश्यन्ते। ये मानवा: धर्म-साहित्य—समाज—देशप्रेमिकादिषु बहुजन-हिताय च प्राणान् उत्सृजन्ति ते नरकुले धन्या: तेषां जीवनं महाजीवनम्।

निष्कर्षरूपेण एतद् वक्तुं शक्यते यत्- अस्मिन् वैज्ञानिकयुगे गीतायां ये उपदेशाः प्रदत्ताः सन्ति ते सर्वे एव जीवनस्योन्नतिप्रदायकाः। समाजे मनुष्यत्वं, मूल्यबोधः जातीयताबोधश्च प्रायश: न दृश्यते। केवलं गीताया: कर्ममार्गै: तानि आनेतुं शक्यन्ते। अत: गीतानिर्दिष्ट: कर्ममार्ग: अस्माकं कर्तव्य:।

'जयतु भगवद्गीता'

[17] श्री. गीता -३/६, नीलकण्ठटीका
[18] श्री. गीता-३/३०
[19] श्री. गीता-३/२०

## सहायकग्रन्थसूची


- श्रीगीता-जगदीशचन्द्रघोष, प्रसिडेन्सी लाइब्रेरी,१९८७,कलिकाता।
- वेद-अनुबदक:श्रीविजन बिहारी गोस्वामी, हरफ़प्रकाशनी, कलिकाता-०७।
- प्रबन्धरत्नाकर-डः रमेशचन्द्रशुक्ल, चौखम्बा विद्याभवन, वाराणसी।
- उपनिषद-सेन, तत्त्वभूषण, घोष, हरफ़ प्रकाशनी-१९८०, कलिकाता-०७।
- संस्कृतसप्तकम्-वन्द्योपाध्याय, प्रधान, ढाका स्टुडेन्ट लाइब्रेरी,कलिकाता।
- लोकप्रज्ञा-UGC Ref. Journal No-ISSN-2229-5364